# भारतीयविज्ञानपरम्परा संस्कृतभाषा च ।

आधुनिकीकरणस्य औद्योगिकीकरणस्य विज्ञान-विस्फोटनस्य च अस्मिन् काले अस्माकं भारतदेशः सर्वेषु मण्डलेषु प्रमुखं स्थानं वर्तति । तस्य प्रधान-कारणम् अयं देशस्य जनाः युवकाः छात्राः चैव । अद्य अस्माकं भारतदेशः अयं देशस्य जनाः च आधुनिक-आरोग्य-शास्त्र-साङ्केतिक-साम्पत्तिक मण्डलेपि अग्रगण्याः सन्ति ।

वेदान्तपण्डितानां, शास्त्रपारंगतानां, तत्वचिन्तकानां च जन्मना पवित्रं भवति इदं भारतदेशः । "माता भूमिः पुत्रोऽहं पृथिव्याः" इति वेदसूक्तिमनुसृत्य भूमें मातृरूपेण पूजितोवन्तो अभवन् अस्माकं पूर्विकाः ।

अस्माकं आर्षभारतसंस्कृतिः, महत्तर आशयसंहिता भारतीयजीवनशैलिं च दृष्ट्वा पाश्चात्यलोको अपि अत्भुतस्तब्धो अभवन् । किन्तु अद्य साम्प्रतं भारतं किं जायमानमस्ति ?

सुखभोगानाम्, आडम्बरवस्तूनां, पाश्चात्यसंस्काराणां पृष्टतः धावमाना एव युवपरम्परा । ते स्वीयं संस्कारं विस्मरन्ति । "जननी जन्मभूमिश्च स्वर्णातपि गरीयसि" इति वाक्यं अगणयित्वा ते पाश्चात्यसंस्कारस्य पृष्टतः

गच्छन्ति। कानिचन युवकाः छात्राः तु उन्मादकवस्तूनि उपयुज्य मातापितरौ न गणयित्वा अध्यापकवाक्यं न श्रुत्वा जीविते दुःखमेव सम्पातयन्ति। न केवलमारोग्यम् अपितु पारिवारिकजीवनं, मानसिकोल्लासं च उन्मादकवस्तूनि अपहरन्ति। अद्य युवकाः छात्राः च आबालवृद्धं जनाः अस्य उपयोगेन अनेकानि सामूहिकविरुद्ध ~~का~~ कार्याणि अकुर्वन्ति। निश्चितसमयस्य आनन्दाय ते स्वीयं जीवितं नश्यन्ति।

भारतस्य ~~प्रथम~~ प्रथम प्रधानसचिवः ~~श्री~~ श्रि जवहर्लाल् नेहरु एवमुक्तं "भारतस्य उन्नतिः स्त्रिणां तथा युवजनानां सामाजीक-साम्पत्तीक उन्नमनेन एव संभविष्यतीति। परन्तु अद्य युवकाः छात्राः तु उन्मादकवस्तूनां, दूरवाण्याः च पृष्ठतः गच्छन्ति। पुस्तकपठनं, कला-कायिक स्पर्धाः, करकौशलवस्तूनां निर्माणं च इदं आसक्तिः निवारयितुं सहाय्यन्ति।

साहित्याः, पुस्तकाः, रचना केवलं मानसिकोल्लासाय न अपितु समाजपरिवर्तनाय अपि सहाय्यन्ति। अस्माकं संस्कृतभाषा सर्वे भारतीयभाषासु जननी इति प्रसिद्धं अस्ति। देवभाषा, अमरभाषा, गीर्वाणभारति इत्यादयः बहवः नाम्ना प्रसिद्धं भवति अयं भाषा।

अस्माकं देशस्य उन्नतेः कारणम् अस्माकं संस्कृतिः, पैतृकता चैव । शास्त्र - गणितशास्त्र - ज्योतिष - साहित्य - वास्तु - शिल्पकला मण्डले च अस्माकं पूर्विकाः अग्रगण्याः अभवन् इति चरित्रं दर्शयति । आर्यभट्टस्य आर्यभटीयम्, भास्कराचार्यस्य लीलावती, वराहमिहिरस्य बृहत्संहिता इत्यादयः बहवः ज्योतिष - गणितशास्त्र ग्रन्थाः वयम् अद्यापि उपयुज्यामः । भारतीय गणितशास्त्रस्य पितुः इति आर्यभटः ज्ञातवन्तः अस्ति । कालिदासस्य रघुवंशम्, कुमारसंभवम्, माघस्य शिशुपालवधम्, भारवेः किरातार्जुनीयम्, श्रीहर्षस्य नैषदीयचरितम् चैव पञ्चमहाकाव्याः ते अद्यापि प्रचुरप्रचारं सन्ति । जयदेवस्य गीतागोविन्दस्य श्लोकाः एव अद्य अष्टपदी इति नाम्ना "कलोत्सवे" छात्राः आलपन्ति । भासस्य त्रयोदश नाटकाः अद्यापि जनाः स्वीकुर्वन्ति । भरतमुनेः नाट्यशास्त्रं अनुसृत्यैव नर्तकाः नृत्यन्ति । चरकस्य चरकसंहिता, सुश्रुतस्य सुश्रुतसंहिता पतञ्जलि मुनेः योगसूत्रं च वैद्याः उपयुज्यन्ति ।

धर्मो रक्षति रक्षितः इति प्रसिद्धं वाक्यं महाभारतस्य एव । वाल्मीकि मुनेः रामायणमेव आदिकाव्यम् । सः महात्मा एव आदिकविः । संस्कृतभाषा केवलं एका भाषा न अपितु इदं राज्यस्य जीवधारा खलु ।

इयं भाषा अस्मपि जनहृदये प्रवहति । अस्य प्रमुखः शास्त्र ज्योतिशास्त्र स्थापनमेव "नासा" । नासा स्थापनस्य पठनं संस्कृतभाषा सङ्गणकयन्त्रस्य "अल्गोरिते" उपयुज्यमाना उत्तमभाषा एव इति वदति । अस्य अस्माकं संस्कृतं संस्कारं विना इयं लोकः एतत् रूपे न भवति । "अहिंसा परमो धर्मः" इति वाक्यं ज्ञात्वा भारतस्वतन्त्राय प्रवर्तितवन्तः अभवन् अस्माकं राष्ट्रपिता महात्मा गान्धी ।

मानवीया अस्थित्वस्य आधारं मानुषिकमूल्येषु बद्धं भवति । ते मानसिकतायाः स्वभावं व्यवहारं च निर्णयन्ति । दया, स्नेहः, करुणा, सहानुभूति इत्यादयः मूल्येन समृद्धं भवति संस्कृतभाषा साहित्यम् । हितोपदेशः पञ्चतन्त्रः, कथासरित्सागरः इत्यादयः अनेकाः ग्रन्थाः पुस्तकाः च संस्कृतसाहित्ये सन्ति । भारतदेशस्य भाविः युवकानां छात्राणां च हस्ते एव भवति ।

अतः ते ये मूल्यानि पठन्ति चेत् इयं भारतदेशे अनेकापि उन्नतिं नयतुं शक्यते ।

"शिक्षा एव सर्वाधिकं शक्तिशाली अस्त्रम्, यत् विश्वं परिवर्तुं शक्यते" इति विश्वप्रसिद्धः नेल्सन् मण्डेला महोदयः एकदा उक्तवान् ।

अतः विद्या विनयं ददाति इति संस्कृतभाषे एकं श्लोकमस्ति। "असतोमा सद्गमय। मृत्योर्मा अमृतं गमय। तमसोमा ज्योतिर्गमय।" इत्येव अध्यापकस्य कर्तव्यमति श्लोकमपि अस्ति।

अस्माकं प्रकृति अथवा पञ्चमहाभूतानि सर्वचराचराणां संरक्षणाय बहु महत्वपूर्णमस्ति। अतः तस्य संरक्षणं अनिवार्यमिति अस्माकं पूर्वकाः ज्ञातवन्तः आसन्। "दश कूप समो वापि, दश वापि समो ह्रदः। दश ह्रद समो पुत्रो, दश पुत्र समो द्रुमः"। इति एकं प्रसिद्धं श्लोकमस्ति। भूमिं मातृरूपेण पूजयित्वा वृक्षपादपे पुत्ररूपेण परिपालितवन्तः एव अस्माकं पूर्वकाः। तत् एव अस्माकं संस्कृतिः।

"यत्र नार्यस्तु पूज्यन्ते रम्यन्ते तत्र देवता।" इति मनुस्मृते श्लोकमस्ति। नारी एव अस्माकं देवता तयोः संरक्षणमेव अस्माकं प्रधान कर्तव्यमिति दीक्षविद्धिर्णं अस्माकं सम्पन्नः संस्कृतेः उदाहरणमेव।

पर्यावरणसंरक्षणं, स्त्रीसुरक्षा, विद्यायाः महत्वं, मानविकता इत्यादयः बहवः कार्याः अस्माकं परम्परा दृश्यन्ति।

इदं आर्षभारतसंस्कृतिः त्यक्त्वा जीवितं अनिवार्यं न भवति।

अस्माकं भारतदेशे अष्टविंशति राज्याः सन्ति ।
सर्वे राज्याः स्वेषु मण्डलेषु उन्नतमं स्थाने विलसन्ति ।
अस्माकं केरलराज्यमपि जवेन उन्नतिं गच्छति ।

विद्याभ्यास - कला - कायिक - आरोग्य - शास्त्र - साङ्केतिक
मण्डले केरलराज्यम् अतिनिपुणमस्ति ।

~~इ~~ अयं राज्यस्य चरित्रं - पैतृकता - संस्कृतिः च
अविस्मरणीयं भवति । ~~मेल्प~~ मेल्पत्तूर् नारायणभट्टपादः ,
शङ्कराचार्यः , संगमग्राम माधवः अच्युतपिषारडिः इत्यादयः
अनेकाः केरलीयजनाः अयं देशस्य राज्यस्य च कीर्ती
उद्घोषयन्ति । कठिनाध्वानेन जीवितं सफलं सुन्दरं च
भवति इति ज्ञातवन्तः अनेकाः जनाः इयं राज्ये अपि
सन्ति । स्वतन्त्राय , समत्वाय प्रवर्तितवन्तः अनेकाः समरनेतापि
सन्ति । पर्यावरणसंरक्षणं , नारी सुरक्षा अनिवार्यमेव इति
ज्ञात्वा प्रवर्तितवन्तः अपि अस्माकं राज्ये देशे च
सन्ति । कानिचन समये वयं इदं कार्यं ~~विस्मरन्ति~~ ।
विस्मरामः , अस्माकं पैतृकता परम्परा संस्कृतिः च
अन्य संस्कारेण सार्धं अनिवार्यं भवन्ति इति इदं
ज्ञात्वा वयं एकतया कर्माणि कार्याणि च करिष्यामः ।

भारतसंस्कृतिः संस्कृतभाषा च भारतजनानां
हृदयस्य एकः अङ्गः एव । अस्माकं परम्परा अस्माकं
दायित्वं सम्पत् च एव ।